**प्रथमसत्रार्द्धम्**

**द्वितीयपत्रम्**

**नव्यव्याकरणम्**

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

अ. **सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** (15×2=30)

1. 'साम्ब' इति पदस्य विग्रहवाक्यं किम्।
2. विशेषप्रतिपत्तिः कथं भवति?
3. एकवाक्यता कतिधा भवति?
4. अनुबन्धलक्षणं किम्?
5. अनुबन्धः अनेकाल्प्रयोजको भवति न वा?
6. निमित्तपदेन कस्य ग्रहणम्?
7. वर्णग्रहणे यदागमपरिभाषा कथं न प्रवर्तते।
8. निर्दिश्यमानस्य लक्षणं किम्?
9. अकज्विषये का परिभाषानप्रवर्तते।
10. विशिष्टरूपोपादानविषया परिभाषा का?
11. का परिभाषा अनर्थकेऽपि तदन्तविधिं बोधयति?

**अथवा**

'भाव्यमानेन सवर्णानां ग्रहणं न' अस्याः ज्ञापकं किम्?

12. 'प्रत्ययलक्षणम्' इति पदस्य कः अर्थः?

**अथवा**

'वर्णाश्रयः' इति शब्दे कः समासः?

13. व्युत्पत्ति-अव्युत्पत्तिपक्षयोः को भेदः?

**अथवा**

उत्तरपदाधिकारपदेन कस्य सूत्रस्य बोधः?

14. 'परमकारीषगन्धीपुत्र' इति पदस्य विग्रहवाक्यं कथम्?

**अथवा**

'स्त्रीप्रत्यये चानुपसर्जने न' इति परिभाषा कां परिभाषां बाधते?

15. संज्ञाविधौ प्रत्ययग्रहणे०-० इति परिभाषायाः ज्ञापकं किम्?

**अथवा**

गतिकारकपूर्वस्याऽपि ग्रहणं कुत्र भवति?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. अणुदित् सूत्रे-अण् ग्रहणं पूर्वेण परेण वेति निर्णयप्रकारं लिखत।

17. नागेशमते यथोद्देशकार्यकालपक्षबीजं वर्णयत।

18. नानुबन्धकृतमनेजन्तत्वम्' इति परिभाषायाः ज्ञापकत्वं यथाग्रन्थं विवेचयत।

**अथवा**

णाणोः सारूप्यम्' असारूप्यं वा' इति सप्रमाणं विवेचयत।

19. उपसर्जनाऽनुपसर्जनभेदं प्रतिपाद्य' अतिकारीषगन्ध्यापुत्रः इत्यत्र सम्प्रसारणाऽभावस्य कारणं विवेचयत।

**अथवा**

शास्त्रीयलौकिकोपसर्जनभेदं फलञ्च यथाग्रन्थं लिखत।

20. व्यपदेशिवदेकस्मिन्' इति परिभाषया अशास्त्रीयधर्मातिदेशे प्रमाणं विवेचयत।

**अथवा**

कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते इत्यत्र कार्यमनुभवन् इत्यंशग्रहणस्य प्रयोजनं विवेचयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. यदागमपरिभाषायाः वर्णग्रहणे प्रवृत्तौ प्रभावं लिखत।

**अथवा**

निर्दिश्यमानपरिभाषायाः ज्ञापकं विवेचयत।

**अथवा**

गौणमुख्ययोः भेदं प्रतिपाद्य यथाग्रन्थम् उभयोः शब्दसाधुत्वे प्रमाणं विवेचयत।